International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(1): 90-91
© 2017 IJSR
www.anantaajournal.com
Received: 27-11-2016
Accepted: 28-12-2016

**Naveen Bhat**
Assistant Professor
Dept. of Cultural Education
Amrita Vishwa Vidyapeetham
Coimbatore, Tamil Nadu, India

**Correspondence**
**Naveen Bhat**
Assistant Professor
Dept. of Cultural Education
Amrita Vishwa Vidyapeetham
Coimbatore, Tamil Nadu, India

# शब्दार्थयोस्सम्बन्धः – तयोर्बुद्धिस्थत्वं च

**Naveen Bhat**

**सारांश**

विश्वस्मिन् विश्वे मानवसंवहनस्याधारभूताः सहस्राधिकं भाषाः विद्यन्ते इति सुविदितम् । भारते उपखण्डे एव १६५२ भाषाः वर्तन्त इति १९६१ तमे ईसवीये वर्षे कृता गणतिः अभिप्रागात् । सतीष्वपि सहस्रं भाषासु केवले संस्कृतवाङ्मये शब्दजालम् अर्थविस्तृतिं चाधिकृत्य आबहोः कालान्महानुद्यमः कृतो दृश्यते । कृतेनैव तेनोद्यमेन ननु सहस्रं वर्षेभ्यः वेदसाहित्यं विनादोषमधुनाऽपि गुञ्जति जगति । उक्तेन शब्देन अर्थस्यावगतेः को नियमः, कस्तत्र तर्कः, केनेदमित्थं व्यवस्थितमित्यत्र चिन्त्यम् । आधुनिके सङ्गणकक्षेत्रे 'NLP' इति काचित् योजना प्रसिद्धिमावहन्ती वर्तते, या च मानवसहजभाषाभ्यः सङ्गणके अर्थावगतिः कथं स्यादिति विषयं अध्येति । क्षेत्रमिदमद्यत्वे संस्कृतव्याकरणेन नितरां सम्बद्धमित्यप्यत्र उल्लेख्यम् । अस्मत्प्राचीना विज्ञाः शब्देभ्यः अर्थानां स्फुरणं कथं जायते इतीमं विषयमाधृत्य कांश्चन सिद्धान्तान् प्रास्तुवन् । विशिष्य व्याकरणे शास्त्रे इयं चर्चा प्रकृष्टतया विहिता । आधुनिकभाषाध्ययनं इमां शास्त्रीयां चर्चां विना अपूर्णा एवेति मन्मतिः । तदनु १७-१८ शतमानयोर्जीवितवतः व्याकरणाचार्यस्य नागेशभट्टस्य सिद्धान्तमाधारीकृत्य शाब्दबोधः अत्र विचार्यते ।

**कूट शब्दः** अर्थः, सम्बन्धः, अभेदः, व्याकरणम्, शास्त्रम्, व्यवहारः, पाणिनिः

## प्रस्तावना

शब्दार्थयोः भारतीयपरम्परायां महत्स्थानं वर्तत इति भारतीयकाव्यशास्त्राद्यवलोकनेन लोकजीवनदर्शनेन च सामान्यतोऽवगन्तुं पारयामः । प्रसिद्धनामानो प्रथितयशसश्च शास्त्रकृतः कवयश्च स्वग्रन्थेषु वाचमर्थं च नितरां प्रशशंसुः । श्रुतिरपि शब्दार्थयोर्माहात्म्यकथनस्योदाहरणानि तत्र तत्र शास्त्रवारिधौ उपलभ्यन्ते । किमुत, निखिलं शब्दजातं विवरीतुमेव व्याकरणनामकं शास्त्रमेकं

चक्रिरे पूर्वसूरयः । न केवलं व्याकरणमपि तु तदितरदर्शनेष्वपि यथायोग्यं शब्दानां वाक्यानां च चर्चा तत्तदाचार्यैः व्याख्याकृद्भिश्च व्यधायि ।

'एकः शब्दः सम्यग्ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति'[1] इतीयं श्रुतिरिति महाभाष्ये महर्षिभिरुदाहृता, या च शब्दानां विषये प्रवृत्तस्य व्याकरणशास्त्रस्य श्रुतिसम्मतिमपि द्योतयति। ऋग्वेदे [2] विद्यमानाः 'देवीं वाचमजनयन्त देवा' इत्याद्यृचः अपि वाचमेव स्तुवन्ति । किमधिककथनेन, समग्रायाः श्रुतेरेव 'शब्दः' इति व्यवहारः सुविदितः । तदनु पुराणेषु वागर्थयोस्समर्चायाः निदर्शनं विद्यते शिवपुराणे,[3] तद्यथा-

'शब्दजातमशेषं तु धत्ते शर्वस्य वल्लभा
अर्थरूपं यदखिलं धत्ते मुग्धेन्दुशेखरः' । इति ।

शब्दार्थयोः पार्वतीपरमेश्वराभ्यां धृतत्वं कीर्तयत्ययं श्लोकः । तदग्रे शास्त्रकृत्सु व्याकरणमन्तरा नैयायिकाः मीमांसकाश्च शब्दार्थयोः अथ च शाब्दबोधस्य चर्चां व्यतनिषुः । काव्येषु तावत् शब्दार्थसपर्यायाः उत्तमोत्तममुदाहरणं भवति कविकुलगुरोः कालिदासस्य रघुवंशमहाकाव्यस्यादिमः श्लोकः -

'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ' ॥ इति ।

शब्दार्थाभिन्नतायाः निदर्शनेन शिवपार्वती स्तौत्यत्र कविः । वायवीयसंहितायाः श्लोकः एव कालिदासस्यापि वागर्थस्तुतेराधारत्वेन प्रतिभासते । पुराणेषु व्याकरणादिशास्त्रेषु च प्रसिद्धायाः शब्दार्थाभिन्नातायाः प्रतिपादनमेव कालिदेसेनापि स्वकाव्यस्यादौ अकारि । शब्दार्थयोस्सम्बन्धवर्णनार्थं शिवपार्वत्योरुदाहरणं नितरां सार्थकमेव । तौ भिन्नौ सतावपि अभिन्नौ स्याताम्, अर्धनारीश्वरस्य परिकल्पनमत्र साधीयः। 'नमः शिवाभ्यां नवयौवनाभ्यां परस्पराश्लिष्टवपुर्धराभ्यां' इत्ययमपि श्लोकः तस्यैवार्थस्य स्मारकः [4] । इत्थं वागर्थयोरादृतिः आभारतसाहित्यसंस्कृतिव्याप्ता इति सामान्या अवगतिः।

**वागर्थयोः सम्बन्धः**

पाणिनिसूत्रमधि भाष्यं लिखद्भिः पतञ्जलिमहर्षिभिः शब्दानुशासनस्य प्रयोजनकथनावसरे 'कस्तर्हि शब्दः' [5] इति वार्त्तिकमारभ्य शब्दार्थयोर्विचारः सविस्तरं न्यरूपि । 'यस्योच्चारणेन तत्तल्लक्षणवद्वस्तु प्रतीयते, सः भवति शब्दः' इत्यर्थिका पङ्क्तिरपि महाभाष्ये विद्यते । तन्नाम, उच्चारितेन वर्णध्वन्यात्मकेन शब्देन लोके यद्द्रव्यरूपेण विद्यमानं वस्तु गम्यते, तदेव चार्थः । वस्तुतः कार्यार्हत्वं वस्तुनि (अर्थे) एव नतु शब्दरूपे तत्सम्भवः, यथा 'गामानय' इत्यादिष्टः भृत्यः सास्नालाङ्गूलवतीं गामेव आनयति, नतु गो शब्दमानयति । 'स्वं रूपं शब्दस्याशब्दसंज्ञा' [6] इति सूत्रे भाष्ये चेदं स्पष्टम् । अत्र शब्दार्थयोर्मध्ये सम्बन्धः कश्चन विद्यत इति गम्यते, यं च सम्बन्धं नित्यमिति कथयति वैयाकरणाः । 'सिद्धे शब्दार्थसम्बन्धे' इति वार्त्तिकेण भाष्यकृता शब्दार्थौ तयोस्सम्बन्धश्च नित्य इत्यभिप्रेतं, तदेव कैयटेनापि न्यगादि [7] । व्याकरणनयस्य मोक्षकारकत्वं प्रतिपादयता वाक्यपदीयग्रन्थकृता हरिणाऽपि –

'इन्द्रियाणां स्वविषयेश्वनादिर्योग्यता यथा
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा' ॥ इत्याह । [8]

इत्थं च शब्दार्थयोस्सम्बन्धः परमस्वाभाविकः, यश्च, इन्द्रियाणां स्वस्वविषयेषु यथा प्रकृतितः एवाभिसम्बन्धः विद्यते तद्वत् शब्दार्थयोर्मध्येऽपि स्वभावसिद्धः । सम्बन्धस्यास्य सत्त्वादेव लोके

[1] महाभाष्यम् ६. १. ८४
[2] ऋग्वेदः ८-१००-११
[3] शिवपुराणम्- ७ - वायवीयसंहिता
[4] शाङ्करम् उमामहेश्वरस्तोत्रम्
[5] महाभाष्यम्, पस्पशाह्निकम्
[6] पा.सू. १-१-६७
[7] तत्रैव सूत्रे प्रदीपः
[8] वाक्यपदीयम्- पदकाण्डम्

शास्त्रे च शब्दमूलको व्यवहारस्सेत्स्यति, अन्यथा भाषेति काचित् नाभविष्यदेव ।

**शब्दार्थयोरभेदः**

गामानयेति वाक्यश्रवणेन सास्नालाङ्गूलवती आनीयते, घटमानयेति वाक्येन कम्बुग्रीवादिमानानीयते – एवं लोके दृष्टः अतिसरलो व्यापारः कथं वस्तुतः सम्भवतीति चिन्त्यम् । गामानयेति वक्ता शब्दः केवल उच्चारितः न च गोव्यक्तिः, घटमानयेति वदताऽपि न घटव्यक्तिः गृहीता । श्रोत्राऽपि शब्द एव श्रुतः, न व्यक्तिः, अथाप्यानयनकर्मणि तु तत्तत्पदवाच्यव्यक्ती प्रयुज्येते । तन्नाम शब्दार्थयोः न केवलः सम्बन्धः विद्यते, अपि तु लोके शब्दार्थयोः अनन्यत्वमपि वर्तते। अत एव शब्दार्थयोर्मध्ये इतरेतराध्यासमूलकः तादात्म्यसम्बन्धः विद्यते इति महावैयाकरणः नागेशभट्टः प्रवक्ति [9] । अध्यासोऽपि लोकव्यवहारादेव सिद्ध्यतीति तदाशयः, यथा – 'कः शब्दः, कोऽर्थः इति प्रश्ने, घट इत्ययं शब्दः, घट इत्ययमर्थः इत्येकाकारकोत्तरदर्शनात्तयोरध्याससिद्धिः' इति। व्यवहारे शब्दार्थयोरभेदः, भेदश्च विद्यते इति वैयाकरणाः। भेदस्यापि सत्त्वादेव मधुशब्दोच्चारणेन मुखे माधुर्यं नोत्पद्यते, अन्यथा तु तदापत्तिः स्यात् । एवं च व्यवहारकाले शब्दार्थयोरभेद एव ग्राह्यो भवति । शब्दे अर्थस्य अर्थे शब्दस्य च समानतया व्यवहारादेव शास्त्रे तद्दोषवारणाय 'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रं वक्तव्यमभवत् । यत्र शब्दस्य शब्दरूपे कार्यमुक्तं तत्र अर्थस्य ग्रहणमुत तदर्थबोधकान्यशब्दग्रहणं वा मा भूत्, यत्र शास्त्रीया संज्ञा विधीयते तत्र संज्ञिनामेव ग्रहणं भवेत् नतु संज्ञिनः इत्येतदर्थकः अयं मुनिप्रयत्नः ।

शब्दार्थयोरयं भेदाभेदव्यवहारः मानवान्तःकरणस्य (विशिष्य बुद्धेः) असामान्या शक्तिरिति निश्शङ्कं वक्तुं पारयामः । अविद्वानपि विनाक्लेशं क्व शब्दरूपस्य ग्रहणं क्व च शब्दार्थस्यग्रहणमिति झटिति विज्ञाय लोकव्यवहारं निर्वहति । तदेव न, क्व जातिग्रहणं क्वच व्यक्तिग्रहणमित्यपि निरर्गलतया वेत्ति । प्रायः अत्र नियामकं भवति प्रकरणम् । अतो लौकिकः सर्वोऽपि प्रकरणज्ञः एव । भाषा इति सङ्कीर्णायाः व्यवस्थायाः समर्थमुपयोगं सामान्योऽपि जनः स्वजीवने कुरुते । एतेनैव भाषा अथवा शब्दजातं नाम मानवबुद्धेर्विषिष्टा शक्तिरिति गम्यते । अत एव अर्थः बुद्धिस्थः इति नवीनवैयाकरणानां प्रतिपत्तिः ।

**अर्थो हि बुद्धिस्थः**

स्वग्रन्थे मञ्जूषाख्ये महावैयाकरणः नागेशभट्टः अर्थस्य बुद्धिस्तत्वमादाय बहुतरं प्रत्यपादयत् । तन्मतानुगुणं अर्थः सर्वदा बुद्धावेव भवति, शब्दोऽपि । अपि च बुद्धिस्थौ शबार्थौ अभिन्नौ । लोके अविद्यमानस्यापि अर्थस्य बुद्धौ सत्त्वात् वास्तवासम्भवार्थस्यापि अवगतिर्भवति । यथा-

'एष वन्ध्यासुतो याति खपुष्पकृतशेखरः
कूर्मक्षीरचये स्नातः शशशृङ्गधनुर्धरः' ॥ [10]

इति कश्चन श्लोकः विद्यते । अत्र प्रत्येकमपि पदस्य नास्ति लोके अर्थरूपं, तेषां सत्तायाः नितरामसम्भवात् । लोके अविद्यमानस्यापि वस्तुनः बुद्धिसत्तामाधारीकृत्य तस्य प्रातिपदिकत्वादिकं भवतीति शास्त्रविस्तरः । यद्यर्थानां बुद्धिसत्ता नाद्रियते तर्हि एषां शब्दानां व्याकरणरीत्या साधुत्वकथनासम्भवात् तद्घटितश्लेकस्य अनारम्भ एव स्यात् । किन्तु मनसि एव शशस्य तत् शृङ्गस्य च परिकल्पनं विधातुं क्षमाः मानवाः । नागेशमतानुसारं 'घट अस्ति' 'घटो नास्ति' इत्यादिव्यवहारोऽपि अर्थस्य बुद्धिसत्तामाधारीकृत्य एव । बुद्धौ सर्वदा सतः घटस्य बाह्ये जगति विद्यमानत्वाविद्यमानत्वे विचार्य एव अस्ति नास्तीति सत्ताविमर्शः क्रियते । अन्यथा केवलस्य घटशब्दस्योच्चारणेनैव घटस्य सत्ताभिधानात् अस्तीति प्रयोगस्य अनावशकत्वम् आपद्येत । दोषानिमान् परिहर्तुमेव अर्थस्य

[9] वै.सि.लघुमञ्जूषा- स्फोटनिरूपणम्

[10] वै.सि.परमलघुमञ्जूषा

बुद्धिस्थत्वमुक्तं वैयाकरणैः । मीमांसकवेदान्तिनौ च इदमेव मतं प्रकारान्तरेण अङ्गीकुर्वन्तीति सनिदर्शनं व्याख्यात् नागेशभट्टः मञ्जूषायाम् ।

इत्थं च शब्दश्रवणेन कर्णकुहरप्रविष्टः शब्दः बुद्धौ सतमर्थमुद्भावयति, तत्पूर्वकमेवार्थबोधं जनयतीति शाब्दबोधप्रक्रिया । अत्र पुनः वर्णस्फोटाद्यष्टविधस्फोटाः शास्त्रकृद्भिरुपवर्णिताः । वाक्यस्फोटवादिनां वैयाकरणानां नये श्रुतेव वाक्येनैव अर्थः स्फुटतीति सिद्धान्तः ।

**उपसंहृतिः**

मनुष्याणां लोकव्यवहारनिर्वाहार्थं प्रवृत्तायाः भाषायाः विषये, तद्घटकानां शब्दानां प्रत्ययानां प्रक्रियाणाञ्च विषये इत्थं विशदरूपेण सैद्धान्तिकी प्रौढा च चर्चा भारतं विहाय नान्यत्र प्रायेण प्राचलत् । इह वर्णानामुत्पत्तिस्थानमपि विचिन्त्य प्रत्येकं वर्णस्य स्वभावं च कथयित्वा आर्थबोधपर्यन्तं शब्दचिन्तनं प्रावर्तत । शब्दसाक्षात्कारेण मोक्षोऽपीति नैके शास्त्रकृतः अभिप्रागुः । शतकत्रयकृद्भर्तृहरिः व्याकरणशास्त्रीयं ग्रन्थं वाक्यपदीयनामकं लिखन् शब्दजालस्य माहात्म्यमित्थं जगाद –

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम्
इयं सा मोक्ष्यमाणानामजिह्मा राजपद्धतिः ॥ इति । [11]

अकुटिला राजपद्धतिरियमिति तस्य कथनम् । अन्ततो गत्वा 'शब्दविवृतमिदं जगत्' इति सिद्धान्तं पश्यामः व्याकरणे । शाब्दबोधः न केवलं अर्थप्रतिपत्तये, किन्तु परमपदप्राप्तिमार्गस्यापि आरम्भः शब्दशास्त्रे एव । उपनिषदा शब्दब्रह्मणः विषये उच्यमानया उक्तिरियम् -

' द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्
शब्दब्रह्मणि निष्णातः परब्रह्माधिगच्छति' ॥ इति । [12]

[11] वाक्यपदीयम् १६-ब्रह्मकण्डम् -
[12] मैत्रायण्युपनिषद् ६-२२

अनेनोपनिषद्वाक्येन सह शब्दार्थसम्बन्दतदभेदतद्बोदसम्बन्धि पत्रमिदमत्रोपसंहरामीति शम् ।

**परिशीलितग्रन्थानामावलिः -**


1. महर्षिः पतञ्जलिः – भार्गवशास्त्री (सं)- पाणिनीयव्याकरणमहाभाष्यम् चौखम्बासंस्कृतप्रतिष्ठानम् 1987, 1,
2. श्री भट्टोजिदीक्षितः – गिरिधरशर्मा पारमेश्वरानन्दशर्मा च (सं)- वैयाकरणसिद्धान्तकौमुदी- मोतीलाल बनारसीदास प्रकाशकाः, देहली
3. आचार्यभर्तृहरिः – पं.रघुनाथशर्मा (सं) – वाक्यपदीयम् – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी91- 1991,
4. महामहोपाध्यायः नागेशभट्टः – आ. रामप्रसादत्रिपाठी (सं)- वैयाकरणसिद्धान्तलघुमञ्जूषा- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी 1990, 12-
5. महामहोपाध्यायः नागेशभट्टः – वैयाकरणसिद्धान्तपरमलघुमञ्जूषा- M. S. University of Baroda, Baroda, 1961
6. पं. रामचन्द्र झा – संस्कृतव्याकरणम् चौखम्बा सुरभारती प्रकाशनम्, वाराणसी 1996, 42.


**संदर्भ ग्रंथ**


1. Internet Archive- https://archive.org/details/Vyakarana
2. Sanskrit Documents - sanskritdocuments.org
3. Scribd.- www.scribd.com
4. Sanskrit.org